श्रीः

श्रीमते रामानुजाय नमः

ध्यानश्लोक रत्नावळि

1 - श्री रङ्गनाथ ध्यानम्

आर्तापाश्रयमर्थिकल्पकमसह्यागस्करक्ष्मातलम् ।
सद्यस्संश्रितकामधेनुमभियत्सर्वस्वमस्मद्धनम् ।
श्रीरङ्गेशरमाश्रयेम कमलाचक्षुर्महीजीवितं ।
श्रीरङ्गे स सुखाकरोतु सुचिरं दास्यं च धत्तां मयि ।
चैत्रे रेवतिसंजातं सौम्यजामातरं प्रभुम् ।
वंदेवात्सल्यनिलयं कल्याणगुण सागरम्॥
लक्ष्मीकल्पलतोत्तुङ्गस्तन्यास्तभक चंचल ।
श्री रङ्गराजभृंगो मे रमतां मानसं भजे ।

2-श्री रङ्गनायकित्तायार् ध्यानम्

चतुर्भुजां महालक्ष्मीं द्विनेत्रां चारुकुण्डलाम् ।
श्वेतमाल्यांबरधरां हारकेयूर भूषिताम् ।
सर्वलक्षणसंपन्नां पीनोन्नत पयोधराम् ।
प्रफुल्लोत्पलविस्तीर्ण लोचनां सुस्मिताननाम् ।
लसल्ललाटतिलकां विद्दमाधर पल्लवाम् ।
कृष्णकुञ्चितकेशान्तां वंशमुक्ताफलद्विषाम् ।
पद्मगर्भोद्भवमाकारां सुमुखीं भावयेत् सदा ॥

3 - श्वेतगिरि (तिरुवेळ्ळरै) श्री पुण्डरीकाक्षस्य धयानम्

आस्तां चेतसि मे निरन्तरमसामंबोधरश्यामळः ।
पुण्ये श्रीमतिपुण्डरीकनयनः श्वेताचलेतस्तिवान्।

मार्कण्डेय विहङ्गराज भुजगादीश क्षमासेवितः ।
चन्द्राऽऽदित्य विधूतचामरयुगो लक्ष्मीसहायो हरिः ।

4-(रथमन्नपुरि) तेरळंदूर् श्री देवाधिराजस्वामि ध्यानम्-

कृष्णारण्ये जगत्यामुपरिचरवसोः स्यन्दनं यत्रमग्नम्।
तस्मिन् देवाधिराजः सततसहचरी रक्तपद्माविानम् ।
तीर्थं दर्शप्रसिद्धं कलिमलहरणं गारुडं तद्विमानम् ।
कावेरीकुंभजाभ्यां उपरिचरवसोःप्राङ्मुखस्तुप्रसन्नः ।
अभ्रश्यामळकान्तमूर्तिमनिशं रक्ताब्जपल्यान्वितम्।
श्रीमत्ताार्क्ष्यविमान मध्यमतटे श्री कृष्णपुर्यांस्थितम् ।
मार्कण्डेय कवेरकलशजप्रह्लाद ताार्क्ष्यान्वितम् ।
श्रीमद्दर्शसरस्तटे निवसितं देवाधिराजं भजे ।

5 - श्री सारनाथस्वामि ध्यानम्-

भक्ताभीष्टफलप्रदाङ्घ्रियुगळं कौशेयराजत्कटिम्।
लक्ष्मीमङ्गळमन्दिरोरविलसन् मुक्तावळीकौस्तुभम्।
हस्तैःशङ्खरथाङ्गपङ्कजगदाबिभ्राणमप्राकृतिम्।
राकाचन्द्रमुखं सुजातमकुटं श्रीसारनाथं भजे।

6 - अपूपघटनायकस्वामि ध्यानम்- அப்பக்குடத்தான்

पलाशविपनान्तरे ह्रदनिवास इन्द्राजले।
विमानवरमाश्रितं विमलमीश इन्द्राश्रितम्॥
विरिञ्चमुखदैवतं विजनतं शरण्यं सताम्।
अपूपघटनायकं सततमादिरङ्गं भजे॥

7 -वैकुण्ठ नारायण ध्यानम्।-1

सव्यं पादं प्रसार्य श्रितदुरितहरं दक्षिणम् कुञ्चयित्वा।
जानुन्यादाय सव्येतरमितरभुजं नागभोगेनिधाय।
पश्चाद्बाहुद्वयेन प्रतिभटशमने धारयन् शङ्खचक्रे।
देवीभूषादिजुष्टो जनयतिजगतां शर्म वैकुण्ठनाथः।

8-अष्टलक्ष्म्याः मङ्गलाचरणम्

वक्राब्जेभाग्यलक्ष्मीः।करतलकमलेसर्वदादानलक्ष्मीः ।
दोर्दण्डे वीरलक्ष्मीः।हृदयसरसिजे भूत कारुण्यलक्ष्मीः।
खड्गाग्रे शौर्य लक्ष्मीः निखिलगुणगणाडंबरे कीर्तिलक्ष्मीः
सर्वाङ्गे सौम्यलक्ष्मीः सकलविजयते सर्वसाम्राज्य लक्ष्मीः। ।

9-श्री सरस्वति देवी ध्यानम्

दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिमयीमक्षमालां दधाना
हस्तेनेकेनपद्मं सितमपि च शुकं पुस्तकं चापरेण।
भासाकुन्देन्दु शंखस्फटिकनिभा भासमानासमाना।
सा मे वाग्देवतेयं निवसतुवदने सर्वदा सुप्रसन्ना ॥

10-श्री हयग्रीव ध्यानम्-1

तुषाराद्रिसमच्छायं तुळसीदामभूषणम्।
तुरङ्गवदनं वंदे तुङ्गसारस्वतः प्रदम्।

11-श्री हयग्रीव ध्यानम्-2

-वंदे तुरङ्गवदनं शशिबिंब संस्तम्- चंद्रावदाताममृतात्म करैस्समंतात्। अंडान्तरं बहिरपि प्रतिभासयंतम्- शंखाक्ष पुस्तकसुबोध युताब्जबाहुम्।

11 श्री हयग्रीव ध्यानम्-3

वंदे लक्ष्मीपतिंदेवं शंखचक्रगदाधरम्।
विद्यामूर्तिं हयग्रीवं शब्दार्थ ज्ञान लब्धये।
अ मृताध्मात मेघाभं अमृताहरणं विभुम् ।
पाञ्चरात्रागमाचार्यं वन्दे वैकुण्ठभूपतिम् ।

12-श्री हयग्रीव ध्यानम्-4 -हयशीर्षसंहिता-22-अ

ममैव लक्षणं वक्ष्ये तन्निबोध सुरोत्तम ।
सटाविभूषिताग्रीवा शिरश्चालकभूषितम् ।
शेषंचतुर्भुजं देहं नृसिंहस्येव कीर्तितम् ।
वामहस्तेऽस्यकुर्वीत वेदाश्चत्वार सुव्रत ।
त्वंचाप्यग्रे स्थितःकार्यो वेदग्रहपुरस्सरम्।
अपरे वामहस्ते तु शङ्खं दद्यात्सुरोत्तम ।
दक्षिणद्वितये दद्यात् गदां चक्रं विचक्षणः ।

13-श्री हयग्रीव प्रार्थना-

ज्ञानानंदमयंदेवं निर्मल स्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवं उपास्महे ।

14–श्री पाञ्चरात्रागमस्य लक्षणम्- 1

सृष्टिश्चप्रळयश्चैव देवतानां समर्चनम् ।
साधनं चैव सर्वेषां पुरश्चरणमेव च ।
षड्कर्मसाधनंचैव ध्यान योगश्चतुर्विधः ।
सप्तभिर्लक्षणैर्युक्तोत्वागमं तद्विदुर्भुदाः ।

15-श्री पाञ्चरात्रागमस्य लक्षणम्- 2

आगतं शिववक्त्रेभ्यो गतञ्च गिरिजाश्रुतौ ।

मतं श्रीवासुदेवस्य तस्मादमाम उच्यते । (तत्ववैशारदी)

16 - रात्रशब्दस्य निर्वचनम्

रात्रं च ज्ञानवचनं ज्ञानम् पञ्चविधं स्मृतम् ।
तेनेदं पाञ्चरात्रं च प्रवदन्ति मनीषिणः ।
ज्ञानं परमतत्वं च जन्ममृत्युभयापहम्।
ज्ञानंद्वितीयं परमं मुमु क्षूणाञ्च वाच्छितम् ।
ज्ञानं शुद्धं त्रितीयं च मङ्गलम् कृष्णभक्तिदम् ।
चतुर्थं यौगिकंज्ञानं सर्वसिद्धिप्रदं परम् ।
ज्ञानंच पञ्चमंप्रोक्तं तद्वै वैषयिकं नृणाम् । (नारदपञ्चरात्रम्)

17 परवासुदेवध्यानम्-

आनन्द लक्षणं रूपं आदिरूपमविक्रियम् ।
सुसूक्ष्मं स्ववशं स्वैरं प रंज्योतिरनामयम् ।
ध्रुवमेकं चिदानन्दं चिद्रूपं सर्वगं परम् ।
स्वभावनिर्मलं नित्यं निस्तरङ्गंनिराकुलम् ।
निर्मर्यादं गुणातीतं स गुणं सर्वकामदम् ।
अध्येयं ध्येयमाश्चर्यमवाङ्मनसगोचरम् ।
षाङ्गुण्यविग्रहं देवं वासुदेवाह्वयं विभुम् ।
सहस्त्रफणसंवीत रत्नकान्तिविचित्रिते ।
शेषासने सुखासीनं सव्यंपादंप्रसारितम्।
दक्षिणंकुञ्चितंपादं तज्जानु न्यस्ततद्भुजम्।
वामबाहुं शेषपीठे न्यस्तं वक्षसि च श्रियम्।
किरीटकुण्डलोपेतं वनमालाविराजितम्।
पीताम्बरधरं सौम्यं कटकाद्यैरलंकृतम्।

(परिवारैः सेव्यमानं मध्यकुम्भे स्मरेद् गुरुः ।)

वासुदेवजगद्योनेसच्चिदानंद विग्रह ।

यावद्बिम्बे प्रार्थयामि तावत् कुम्भे स्थिरो भव.

अत्र पूजां मया दत्तां गहाण पुरुषोत्तम। (श्रीः)

18-परमपदस्य वर्णनम्-1

परमानन्दनामानं वैकुण्ठं परमं पदम् ।

कोटियोजनविस्तीर्णं तावदाययममुच्छ्रितम् ।

दिव्यरत्नमयैश्चित्रैः प्राकारैर्गोपुरैर्युतम् ।

दिव्यैर्नानामणिमयैर्गृहपङ्क्ति विराजितम् ।

शक्रचापौघसंकाशैः प्रोच्चैः सौधैरलंकृतम् ।

सुधाकरसहस्राभैः पुरुषैरुपशोभितम् ।

सर्वे चतुर्भुजाः शुद्धाः स्वात्मेशसमविग्रहाः ।

शंखचक्रधराः सर्वे स्रग्विणः पीतवाससः ।

अप्राकृतमया नित्याः पुनरावर्तिवर्जितः ।

एकायनारव्यवेदेन जितन्तादि स्तवैरपि ।

शरच्चन्द्रसहस्राणां कोटितुल्य तनुप्रभाः ।

पुण्डरीकेक्षणाः सर्वा नित्ययौवन शोभिताः ।

सर्वलक्षणसंपन्ना लक्ष्मीतुल्याश्च योषिताः ।

मोदन्ते परमे व्योम्नि नित्यानन्दमयेक्षये ।

एता अपि रमानाथं पूजयन्ति स्तुवन्ति च । (श्रीः)

(अन्यत्र)

19-शङ्खं चक्रं गदां पद्मं चतुर्भिर्धारयेत् भुजैः ।

अर्चनीया परो देवः शुद्धस्फटिकसन्निभः ।

सृष्टिबीजं तथा पद्मं चक्रं स्थितिनिबन्धनम् ।
गदां संहारबीजं तु शङ्खं मुक्ति निबन्धनम् ।

20-द्वादशाक्षर ध्यानम्-

चतुर्बाहु मुदाराङ्गं सर्व लक्षणलक्षितम्।
शुद्ध स्पटिक वर्णाभम् अयुतेन्दु समप्रभम्।
चारुहासम् सुताम्रोष्टं कर्णान्तायतलोचनम्।
निर्धूत पद्म रागाभ दन्तच्छविसुशोभितम् ।
महोरस्कम् महाबाहुम्प्रसन्नेन्दुनिभाननम्।
सुभू ललाटम्सुमुखंघनकुञ्चित मूर्धजम्।
तटिच्छत सहस्राभं पीत निर्मल वाससम् ।
पाणिपादतलांभोजम् पुण्डरीकायतेक्षणम्।
श्रीवत्साङ्गं किरीटादि सर्वाभरण भूषितम् ।
पद्म चक्र गदा शंरवधारिणम् कौस्तुभोरसम् ।
दिव्यगन्धविलिप्ताङ्गं दिव्यमालाविभूषितम् ।
शेषाहिभोगे विपुले सुखासीनम् चतुर्मुख ।
श्रीभूमि सहितम् देवम् ललाटे श्वेतमृत्स्नया ।
कृतोर्ध्व पुण्ड्रतिलकैः मण्डितम् चण्ड भानुभिः ।
नियुतै रयुतैश्चन्द्रैः विद्युत्कालाग्निकोटिभिः ।
समवेतैरिवैकत्र तेजःपुञ्जैः विसर्पिभिः ।
भ्राजमानंदुरालोकम् देहमण्डल निर्गतैः ।
भासयन्तंजगत्सर्वम् ध्यायेत् प्रक्षीण कल्मषः ।
सितम् कृष्णं च धूम्राभम् श्यामं तारानिभं तथा । ।
स्पटिकाभं च शङ्खाभम् रक्तम् शुक्लं च लोहितम् । ।

तमोरूपम् पीतवर्णम् ध्यायेन् मन्त्रद्विषाक्षरम् ।

21-श्रीमन्नारायणस्य ध्यानम्-

-चतुर्भुज मुदाराङ्गंचक्राद्यायुध सेवितम्।
कालमेघ प्रतीकाशम् पद्मपत्रायतेक्षणम् । ।
पीतांबरधरम्सौम्यम् प्रसन्नेन्दुनिभाननम्।
चारुहासम् सुताम्रोष्टं रत्नोज्वलितकुण्डलम्। ।
सुभ्रुललाटमकुटं घनकुञ्चितमूर्धजम्।
ललाटतिलकं सौम्यं दीपवत् श्वेतमृत्स्नया । ।
स्फुरत्कटककेयुर हारकौस्तुभभूषितम्।
स्फुरत्भास्वरवर्णाभं शोभितं वनमलया ।
प्रद्योदनसहस्त्राभं भूषणैरपि मण्डितम् ।
दिव्यचदनलिप्ताङ्गंदिव्यमाला विभूषितम् ।
श्रीभूमिभ्याम् सुखासीनम् स्वर्ण सिंहासने शुभे ।
ध्यात्वैवम् देवदेवेशम् मन्त्रजापपरो भवेत् । ।
शुक्लंहिरण्मयं कृष्णं रक्तम्कुङ्कम संनिभम्।
पद्मकिञ्जल्क सदृशम् सर्ववर्णकमष्टकम् ।

21-श्रीदेव्याः ध्यानम्-1

रक्तपङ्कजवर्णाभां लक्ष्मीं नीलांबुजेक्षणाम् ।
देव भ्रू समसन्मानां द्विभुजां नक्रकुण्डलाम्।
स्वर्णचेलसमायुक्तां ब्रह्मसूत्रविराजिताम्।
करण्डमकुटोपेतां स्तनबन्ध समन्विताम् ।
कटकाद्यैरलङ्कारैः नूपुरान्तैरलंकृताम्।
पद्मपीठे सुखासीनां वामेन चरणेन तु ।

प्रसारितेन दक्षेण चरणेनाति शोभनाम् ।
अभयं दक्षिणेनैव सनालं च अर्थपुल्लकाम् ।
कमलं वामहस्तेन बिब्रतीं च श्रियं स्मरेत् ।

22- श्रीदेव्याः ध्यानम्-2

श्रियं च दक्षिणेपार्श्वे चिंतयेत्पद्मसंभवाम् ।
तप्तहाटकसंकाशां पद्मपत्रायतेक्षणाम् ।
तिसृभिः परिचूडाभिः ललाटोपरिशोभिताम् ।
स पद्मवामहस्तान्तां कक्ष्याबद्धघनस्तनीम् ।
प्रसारितेतरकरां सर्वाभरण भूषिताम् ।
प्रसन्नवदनाम् देवीं भगवत्पादवीक्षणाम्।
त्रिभङ्गीम् कोमलांकान्तां सुमुखीं भावयेत्सदा ।

23-भूदेव्याः ध्यानम्-1

दुग्धौघ दवलां पुष्टीं आनन्दांगुलिताननाम्।
लक्ष्मीमान समोच्छ्रायां द्विभुजां नक्रकुण्डलाम् ।
करण्डमकुटोपेतां स्तनबन्ध विवर्जिताम् ।
नीलकौशेय वसनां यज्ञसूत्रविराजिताम् ।
कटकाद्यैः नूपुरान्तैः आकल्पैस्तु विभूषिताम् ।
पद्मपीठे सुखासीनां दक्षेण चरणेन तु ।
प्रसारितेन वामेन चरणेनातिशोभनाम् ।
दक्षहस्तेन कल्हार सनालं वामपाणिना ।
वरदं बिभ्रतीं भूमिं स्मरेदेवं तु देशिकः ।

24-भूदेव्याः ध्यानम्-2

वामपार्श्वे महींदेवीं द्विहस्तां श्यामलप्रभाम् ।

स्तनबंधविहीनाङ्गीं सर्वाभरण भूषिताम् ।
त्रिभङ्गींकोमलांकान्तां लक्ष्मीवन्मकुटोज्वलाम् ।
वहन्तीं दक्षिणेहस्ते लसत्कल्हारकुड्मलाम् ।
प्रसारितेतरकरां प्रसन्नेंदु निभाननाम् ।
भक्ताभीष्टप्रदां देवीं सुमुखीं भावयेत्सदा ।

भूदेव्याः ध्यानम्-3

25-नीलषट्पदपुंजाभ कुटिलालककोमले ।
कल्हारदक्षिणकरे भोगशक्ति स्वरूपिणी ।
समस्त चिदचिद्भेद मन्त्रयन्त्र विधायिनी ।
भूदेवी त्वां प्रार्थयामि सान्निध्यं कर्तुमर्हसि । (जयोत्तरे)

26–नीळादेव्याः ध्यानम्- 1

नमस्संपूर्णषाड्गुण्य विग्रहायै किटिप्रिये ।
स्वतन्त्रं विश्वसिद्धानां हेतिश्चात्र महाद्भुते ।
तत्वाऽरविंदसंदोह विहार चतुरश्रमे ।
नीलजीमूतसंकाशे हेमांबरसुमध्यमे ।
कल्हारकुड्मलकरे सर्वभूषणमण्डिते । (विष्णुतत्वे)]

27-नीळादेव्याः ध्यानम्-2

श्रीमत् श्रीतुलसीरूपां विष्णुपत्नीं हरिप्रियाम्।
सर्वाभरणसंयुक्तां नीलादेवीमहं भजे । (पराशरे) -

28-श्रीविष्णुषडक्षर(शयनबेर) ध्यानम्

विष्णुं सारथचंद्रकोटिसदृशं शङ्खं रथाङ्गं गदा ।
अंबोजं ददतं सिताब्जनिलयं कान्तं जगन्मोहनम् ।
आबद्धाङ्गद हारकुण्डलमहा शोभास्फुरद्वक्षसम्।

श्रीवत्साङ्गमुदारकौस्तुभधरं वन्देमुनीन्द्रावृतम्।

29-व्यूहवासुदेव ध्यानम्।

चतुर्भुजमुदाराङ्गैः शंखचक्रादिचिह्नितैः ।
नानाध्वज विचित्राङ्गैर्वासुदेवादि संज्ञितैः ।
व्यूहैः स्वं प्रविभज्यास्ते विभुर्नाम स्वलीलया ।
तत्राद्यं भगवद्रूपं हिमकुन्देन्दु कान्तिमत् ।
चतुर्भुजं सौम्यवक्त्रम् पुण्डरीकनिभेक्षणम् ।
पीतकौशेयवसनं सुपर्णध्वज भूषितम् ।
मुख्यदक्षिणहस्तेन भीतानामभयप्रदम्।
तथाविधेन वामेन दधानं शंखमुत्तमम् ।
अपरेण दधानं च दक्षिणेन सुदर्शनम् ।
वामेन च गदां गुर्वीं निषण्णां वसुधातले ।
संचिन्तयेत् पुरोभागे वासुदेवमितीदृशम् ।(लक्ष्मी तन्त्रम्

30-<u>सारूप्य(संमोदन)वैकुण्ठे विराजित संकर्षण ध्यानम्।(वर्णनम्)</u>

ध्यायेत् सारूप्य वैकुण्ठं संमोदनमुदाहृतम् ।
विरजापरिघोपेतं सप्तावरण शोभितम् ।
अयुतैर्योजनानां च विस्तारायाम सम्मितम् ।
सूर्य लक्ष समप्रख्यैः प्रासादादिभिरुज्ज्वलम् ।
शङ्ख चक्रधरैर्दिव्यैश्चतुर्भुज समन्वितैः ।
पीतांबरैः पृथूरस्कैः पद्मपत्र निभेक्षणैः ।
स्तुवद्भिश्चैव नृत्यद्भिर्गायद्भिश्चैव भक्तितः ।
तैः संवृतो जगन्नाथस्तस्मिन् लोके जगद्गुरुः ।
आस्ते संकर्षणो देवः कीर्त्यासह सुखासने ।

31- सामीप्य (आमोदन)वैकुण्ठे विराजित प्रद्युम्न ध्यानम्।(वर्णनम्)

स्मरेत् सामीप्यवैकुण्ठमामोदनमथोपरि ।
पूर्ववत्तु विमानाद्यैर्गोपुराद्यैः सुशोभितम् ।
सूर्यायुतसमप्रख्यैः शतयोजनमुच्छ्रितैः ।
प्राकारैः पञ्चभिर्दिव्यैः शोभितं परमाद्भुतैः ।
योजनानां सहस्रैस्तदायामं चापि तत्समम् ।
इतस्ततश्च धावद्भिः भगवत्कर्मतत्परैः ।
अलंकृतं विष्णुभक्तैः शतशोऽथ सहस्रशः ।
तस्मिन् लोकवरे दिव्ये भगवान् भक्तवत्सलः ।
सुखमास्ते हि लोकेशः प्रद्युम्नोजयया सह ।

32-प्रमोदनवैकुण्ठे (सालोक्यपदेविराजित अनिरुद्धमूर्ति ध्यानम्)वर्णनम्

अव्यक्तं च ततो ध्यायेत् प्रमोदनमुदाहृतम्।
तत्तु सालोक्यवैकुण्ठं विमानैः स्वर्णनिर्मितैः ।
नानारत्नमयैश्चित्रैः प्रासादैर्गोपुरैरपि ।
अप्राकृतैर्मनोहार्यैः कल्पवृक्षैश्च संवृतम् ।
मणिकुट्टिम सोपान महार्हमणिवेदिकम् ।
शतयोजन विस्तारम् अनेक शतमायतम् ।
तस्मिन् लोकोत्तरे दिव्ये प्रथमे देवपूजिते ।
आस्तेऽनिरुद्धो भगवान् मायादेवी समन्वितः ।

33–क्षीराब्धिनाथध्यानम्-1

आमोदेभुवने प्रमोदउत संमोदे च संकर्षणम् ।
प्रद्युम्नं च तथानिरुद्धमपि तान् सृष्टि स्तिथीचाप्ययन् ।
कुर्वाणानतिमुख्यषड्गुणवरैर्युक्तास्त्रियुग्मात्मकैः ।

व्यूहाधिष्टितवासुदेवमपि तं क्षीराब्धिनाथं भजे ।

34– क्षीराब्धिनाथध्यानम्-2

अथापश्यत्परं देवं क्षीरसागर शायिनम् ।
अनन्तभोगशय्यायां शयितं पङ्कजेक्षणम् ।
शङ्खचक्रगदापद्मान्धारयन्तं चतुर्भुजम्।
श्रिया चरणयोर्जुष्टं श्यामलं पीतवाससम् ।
श्रीवत्साङ्कं प्रसन्नाभं कौस्तुभोज्वल वक्षसम् ।
सेवितं वैनतेयेन सन्निविष्टेन पार्श्वतः ।

35- वैकुण्ठनाथध्यानम्

सव्यं पादं प्रसार्य श्रितदुरितहरं दक्षिणम् कुञ्चयित्वा ।
जानुन्यादाय सव्येतरमितरभुजं नागभोगेनिधाय ।
पश्चाद्बाहुद्वयेन प्रतिभटशमने धारयन् शङ्खचक्रे ।
देवीभूषादिजुष्टो जनयतिजगतां शर्म वैकुण्ठनाथः ।

36 सूर्यमण्डल मध्यस्तिथ नारायणध्यानम्-

ध्येयस्सदासवित्रु(द्रु)मण्डल मध्यवर्ति नारायणः
सरसिजासनस्सन्निविष्टः ।
केयूरवान् मकरकुण्डलवान्
किरीटिहारि हिरण्मयवपुः धृतशङ्ख चक्रः।
(शङ्खचक्रगदापाणे द्वारकानिलयाच्युत ।
गोविन्दपुण्डरीकाक्ष रक्ष मां शरणागतम् ।)

37-अश्वत्थनारायण ध्यानम्।

श्वेतवर्णं स लक्ष्मीकं बुजाष्टक विभूषितम् ।
शंख चक्रधरं देवं पीतवाससमच्युतम् ।
अभयं वरदं शान्तं खड्गखेटक धारिणम् ।
धनुर्भाणसमायुक्तं चिंतयेत् पुरुषोत्तमम्।

38- लक्ष्मीनारायण ध्यानम्-1

त्रैलोक्याधार चक्रं तदुपरिकमलं तत्रचाऽनन्तभोगि ।
तन्मध्ये भूमिपद्माङ्कुश शिखरदलं कर्णिकाभूतिमेरुम् ।
तत्रत्यं शान्तमूर्तिं मणिमयमकुटं कुण्डलोद्भासिताङ्गम् ।
लक्ष्मीनारायणारव्यं सरसिजनयनं संततं चिन्तयामि ।

39- लक्ष्मीनारायणध्यानम्-2

उद्यदादित्य संकाशं पीतवासं चतुर्भुजम् ।
शङ्खचक्र गदापाणिं ध्यायेल्लक्ष्मीपतिं हरिम् ।

40- अभिन्न लक्ष्मीनारायणध्यानम्।

वपुषे दक्षिणेभागे विष्णुः वामेसरोरुहा ।
पीनस्तनतटोवामः श्रीवत्साङ्कस्तथेतरः ।
वामे हेमनिभः श्यामो दक्षिणोभाग इष्यते ।
आसीनं वा शयानं वा गरुडारूडमेव वा । पाद्मसंहिता-क्रियापादम्।

41- अष्टभुज नारायणध्यानम्। (परमसंहिता)

अष्टबाहुस्तदाराध्यो रक्तपद्मो जनार्दनः ।
वाहनेनायुधैश्चापि परिवारैश्च संभूतः ।
अनन्तः पन्नगः प्राच्यां पश्चिमायां तु पक्षिराट् ।
देवस्य वामतो लक्ष्मीः दक्षिणेन सरस्वती ।
आग्नेया बुद्धिरेवस्यात् नैऋत्यां सिद्धिरुच्यते ।
वायव्यां मतिरुद्धिष्टा शांतिरीशानगोचरा ।
शंखं चक्रं गदापद्म खड्गं खेटं शरं धनुः ।
इत्यायुधानि देवस्य करेष्वष्टसु पद्मज! ।
उरसा कौस्तुभंरत्नं श्रीवत्सं च समुद्वहन् ।
लोकोपकारसिद्ध्यर्थं अनेकं रूपमाश्रितः । (परमसंहिता-479 85)

42-सूर्यनारायणध्यानम्-बृहद्ब्रह्मे-3-7

सूर्यमण्डलमध्यस्थमरविंदकृतासनम्।
पीनायतचतुर्बाहु मुत्पल्लस्त्रजमच्युतम्।
दरारिगद्योपेतं उत्फुल्लकर पङ्कजम् ।
श्रीनिकेतं श्रियं तद्वदनवद्य रुचिंस्मरेत् ।

43-श्रीकरमूर्ति (गरुडारूड लक्ष्मीनारायणध्यानम्)

आदित्यचंद्रावपि शंखचक्रे शंखप्रसूनाख्यनिधी ददानः ।
चिन्त्यः कराभ्यां वसुतर्पयन् सः स्वांकस्थलक्ष्मीः गरुडांससंस्थः ।

44-हंसमूर्ति-ध्यानम्-

ध्यायेत् रवींदुकरमिंदुसहस्रलक्ष कान्ति प्रियासहित मास्थित मिंदुबिम्बे ।
शंखारिदोर्ध्वयमुदर्क महेंदुबिम्बात् संसिच्यमानममृतेन रमाधिनाथम्

45 दधिवामन (अन्नमूर्ति) ध्यानम्

ध्यायेत् सु शुक्लमरविंद दलायताक्षं
सौवर्णपात्र दधिभोज्यमथामृतं च ।
दोर्भ्यां दधानमखिलैश्च सुरैस्समेतम्
शीतांशु मण्डलगतं रमया समेतम् ।

45-मत्स्यमूर्तिध्यानम्- (विष्वक्सेन संहिता)

शतपत्रमयस्याथ पुण्डरीकस्य मध्यमे ।
पद्मासनस्थं मत्स्याष्टपरीतं कनकप्रभम् ।
त्रिनेत्रं द्विभुजं चैव प्राङ्मुखं पद्मधारिणं ।
सर्वावयसंपूर्णंसर्वाभरणभूषितम्।
मत्स्यादिमानिनं मूर्तिमित्थमुक्तं च नारद ।
पद्मपूर्वदले मत्स्यं राजतं च विन्यसेत् ।
सौम्यदिग्दलमध्ये तु मत्स्यं ताम्रनिभं न्यसेत्।
नैऋत्यदिग्दले मत्स्यं कृष्णवर्णम् तु विन्यसेत्।
वारुणे दिग्दले मत्स्यं रक्तवर्णं तु विन्यसेत्।
वायव्य दिग्दले मत्स्यं श्यामवर्णं तु विन्यसेत्।
सौम्यदिग्दलमत्स्यं तु ताम्रवर्णं तु विन्यसेत्।

ईशानदिग्दले मत्स्यं रक्तवर्णं तु विन्यसेत् ।।
इत्यष्टदिग्दलस्थैस्तु मत्स्यैरभिमुखीकृतम्।
अस्य दक्षिण पार्श्वे तु श्रियं पुष्टिं परत्र तु।

46-कूर्ममूर्तिध्यानम्

कालाञ्जनगिरिप्रख्यं त्रिणेत्रं स्वाङ्गशोभितम्।
चतुर्बाहुयुतंचैव सर्वाभरण भूषितम्।
*अञ्जनभूभृत्सन्निभमूर्तिं द्वादशपत्रे वर्ततमब्जे।
पद्मसमारव्यस्वासनयुक्तः कूर्मशरीरी विष्णुरिहास्ते।
शङ्खचक्रधरश्चैव पद्महस्तस्तथैव चा
ततो द्वादशकूर्मा हि देवोऽप्यभिमुखीकृतः ।
अस्य दक्षिणहस्तेन चक्रपद्मेकरान्तरे।
वामोर्ध्वशङ्खमित्युक्तं पद्मंचाधस्थिते करे।
प्राक्क्रमतोब्जद्वादशपत्रारूडशरीरैः द्वादशकूर्मैः ।
अञ्जनवर्णप्ररव्यशरीरै रावृतमूर्तिः स्वाभिमुरवस्थैः ।
अस्यदक्षिणपार्श्वे तु श्रियं विन्यस्य बुद्धिमान्।
पुष्टिं वामे न्यसेदेवं कूर्ममूर्तिरुदाहृतः ।

47-भूवराहध्यानम्-1

श्यामः सुदर्शनधराभयसद्वरेड्यो भूम्यायुतोऽखिलनिजोक्तपरिग्रहैश्च ।
ध्येयोनिजैश्च तनुभिस्सकलैरुपेतः कोलो हरिस्सकलवांछित सिद्धये नः ।

48- भूवराहध्यानम्-2

श्वेतं सुदर्शनतरङ्गितपादयुग्मम् दंष्ट्रा करालवदनम् धरया समेतम् .
ब्रह्मादिभिस्सुरगणैः परिसेव्यमानम् ध्यायेद्वराहवपुषं निजमैकवेद्यम् .

49- भूवराहध्यानम्-3

ध्यायेद्वराहरूपम् नलिणरुचिदृशं शुक्लदंष्ट्रायतास्यम्
वामाङ्गे ऊरुमूले विकसितवदनाम् भूमिदेवीं वहन्तम्.
लोकत्राणायमग्नां प्रलयजलनिधौ लोकधात्रिं करेण.
बिभ्राणं दिव्यमूर्तिं उरगपतिशिरन्यस्त पादारविन्दम्..

50- भूवराहध्यानम्-4

श्वेतंवराहवपुषं क्षितिमुद्धरन्तम् शंखारिसर्ववरदाऽभय युक्तबाहुम् ध्यायेन्निजैश्च तनुभिस्सकलैरुपे तं पूर्णं विभुम् सकलवांछित सिद्धयेऽजम् 51- यज्ञ

वराहध्यानम्- ईश्वर संहिता-24a- 238-243

तं महापुरुषं बृह्म वासुदेवमजं हरिम्।
ध्यायेद्वै सूकरात्मान मञ्जनाद्रिसमप्रभम् ।
यज्ञाङ्गचिह्नितार्ङ्घिं च महाव्याहृति दंष्ट्रिणम् ।
भूर्भुवः स्वः शरीरं च शब्दबृह्मैक मानसम् ।
निर्णुदन्तं प्रपन्नाना मविद्यापङ्कमञ्जसा।
वैद्येन पोत्र प्रान्थेन त्वक्षयेनामलेन च.
वासनावासितानां च जीवानां भवशान्तये।
महाविभूतिर्भगवान् पूर्णषाड्गुण्य विग्रहः ।
स्वकाच्छान्ततराद् बृह्म तत्वादादाय चांजलिम्।
करोति सेचनं दोषदग्धानां च स्वतेजसा।
स्थूलरूपेण तमजं बहिराराधना विधौ।
आध्मातं वायुना यद्वन्निर्धूमाङ्गार पर्वतम्।

श्रीलक्ष्मीनृसिंहध्यानम्-1

शरच्चंद्रनिभं देवं शंख चक्र वराभयान्।

बिभ्राणं पुण्डरीकाक्षं लक्ष्म्यालिंगित विग्रहम्।
सिंहवक्त्रं महाकायं नृसिंह्मं हृदि भावयेत्।

52- श्रीलक्ष्मीनृसिंहध्यानम्- 2

सत्यज्ञानसुखस्वरूपममलं क्षीराब्धिमध्यस्थितम्।
योगारूडमतिप्रसन्नवदनं भूषासहस्त्रोज्ज्वलम्।
त्र्यक्षं चक्र पिनाकसाभयकरं बिभ्राणमर्कच्छविम्।
छत्रीभूतफणीन्द्रमिन्दुधवलं लक्ष्मीनृसिंहं भजे।

53-योगनृसिंहध्यानम्।

शङ्खचक्रधरं चैव सर्वाभरणभूषितं।
सर्वावयवसंपूर्णस्सर्वसिद्धिकरश्शुभः ।
चक्रं च दक्षिणेहस्ते शंखं वामे न्यसेद्बुधः ।
योगपट्टसमायुक्तमासीनं सम्यगासने।
हस्तयोःकूर्परन्यस्य पादजानूरु संस्थितः ।
श्रीभूमिभ्यां समोपेतं बृह्मशंकर संयुतम्। (विष्णुतन्त्रे-17-a)

54-श्रीसुदर्शननृसिंहध्यानम्- 1

त्रिनेत्रं चतुश्चक्रसंशोभिहस्तं स्थितं तं च पङ्केरुहेयोगपीठे।
महोग्राकृतिं कालविद्युत्सकाशं नृसिंहं भजे चक्रपश्चात्सुसंस्तम्।

55-श्रीसुदर्शननृसिंहध्यानम्- 2

बिभ्राणं शक्तिखड्गं ज्वलमथसृणिम् दन्तकुन्तौ कुठारौ ।
शङ्खं चक्राब्जपाशान् हलमुसलगदा खेटशूलांश्च दोर्भिः ।
प्रत्यालीडं समीडे त्रिनयनमरुणे पिङ्गकेशं सु दंष्ट्रम् ।
देवंपश्चार्धयोगासनलसित चतुश्चक्र भास्वन्नृसिंहम्। शेषसंहिता। ।

56- श्रीसुदर्शननृसिंहध्यानम्- 3

चकद्वयं अंकुशपादयुक्तं । चतुर्भुजं भीकरसिंहवक्त्रं ।
नेत्रत्रयालंकृत निर्मलाङ्गं । नमामि सौदर्शन नारसिंहम् ।

57- त्रिविक्रममूर्तिध्यानम्- 1

स्फुरत्किरीटा ङ्गदमीनकुण्डल श्रीवत्सरत्नोत्तम मेखलांबरैः ।
मधुव्रतस्त्रग्वनमालयावृतो रराजराजन् भगवानुरुक्रमः ।
क्षितिं पदैकेन बलेर्विचक्रमे नभश्शरीरेण दिशश्च बाहुभिः ।(शेषसंहिता)
वदं द्वितीयात् क्रमतः त्रिविष्टपम् न वै तृतीयस्य तदीयमण्वपि ।

57- त्रिविक्रममूर्तिध्यानम्- 2

चतुर्भुजं वा बहुभिर्बाहुभिर्वा समन्वितम् ।
तस्य दक्षिणपार्श्वे तु वामनं वामनाकृतिम् ।
तस्यापसव्ये दैत्येन्द्रं बलिं करकधारिणम् ।
भुवनत्रयधातारं स भार्यां स पुरोहितम् ।
वामपार्श्वे तु पक्षीन्द्र मुष्टिना शुक्रघातिनम् ।
वामभित्तौ विधातार मुपरिष्टादवस्थितम् ।
क्रममाणस्य देवस्य सव्यांघ्रि क्षालनोद्यतम् ।
पादोदकसमुद्भूता गङ्गामाकाशमानिनीम्।
तर्जन्या वामया चापि निर्दिशन्तं समुद्भतम् ।
चरणं सव्यमत्युच्चैः श्यामलं पीतवाससम् । ।
शङ्ख चक्र गदा खड्ग धनुः पाशादि धारिणम्।
जाम्बवन्तं च भित्तौ तु भेरीताडन तत्परम् ।
देवर्षिगण सङ्घातान् कृतांजलिपुटान् स्थितान् ।
भित्तीकृत्वा ततः कर्माद्यर्चां चैव चतुर्भुजः। पाद्मे क्रियापादे17अ

59-श्रीरामध्यानम्- 1

वामेभूमिसुता पुरश्चहनुमान् पश्चात्सुमित्रासुतः
शत्रुघ्नो भरतश्च पार्श्वदलयोर्वाय्वादिकोणेषु च-
सुग्रीवश्च विभीषणश्चयुवराट् तारासुतो जांभवान्।
मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम्।

60- श्रीरामध्यानम्-2

प्रार्थनावरुणस्साध्यं शार्ङ्गिणं रामरूपिणू।
वीरासनेसुखासीनां सीतां काञ्चन सन्निभाम्।
भजतां कामदां नित्यं चामीकर करांबुजाम्।
लक्ष्मणं दक्षिणे पार्श्व कोदण्ड द्वयधारिणौ।
पार्श्वयोः भरतशत्रुघ्नौ छत्र चामर वाहिनौ।
तदग्रे च हनूमन्तं सवीणं सहपुस्तकम्।

श्रीरामध्यानम्-3

श्यामं वारिजपत्रनेत्रममलं प्रज्ञानमूर्तिं हरिम्।
विद्युद्दीप्तपिशंग रम्यवसनं भास्वत्किरीटोज्जलम्।
कर्णालंबितहेमकुण्डललसद् ब्रूवल्लिमत्यद्भुतम्।
श्रीमन्तं भगवन्तमिंदुसहितं श्रीजानकीशं स्मरेत्। (बृहद्ब्रह्मसंहिता)

61 –श्रीरामध्यानम्-4

वामाङ्कस्थितजानकी परिलसत्कोदण्डदण्डं करे।
चक्रंचोर्द्धकरेण बाहुयुगले शंखं शरं दक्षिणे।
बिभ्राणं जलजादपत्रनयनं भद्राद्रिमूर्ध्निस्थितम् ।
केयूरादिविभूषितं रघुपतिं सौमित्रियुक्तं भजे । (वायुसंहिता)

62- योगरामध्यानम्-

अथ ध्यानमहं वक्ष्ये रामस्याद्भुतकर्मणः ।
कालमेघसमच्छायं वीरासन समन्वितम् ।
दक्षहस्ताग्रविलसत् ज्ञानमुद्राभिशोभितम् ।
वामजानु कटिन्यस्त वामपाणि विराजितम्।
वामपार्श्वस्थया देव्या करविन्यस्त पद्मया ।
विद्युन्निभाङ्गयाश्लिष्टं सीतां सर्वविभूषिताम्
माणिक्य मकुटोद्भासि मौलि माविस्मिताननम् ।
नानारत्न विभूषाभिः पारिभूषित विग्रहम्।
सर्वाभरणसंयुक्तं पार्श्वे लक्ष्मण सेवितम् ।
सुग्रीव हनुमत्प्रख्यैः अन्यैश्च मुनिभिर्युतम् । (अगस्त्यसंहिता -3० अ)

भोग रामध्यानम्

साधु वक्ष्यामि सर्वं ते शृणुष्वावहितो मुने ।
सीता लंकृतवामाङ्कं द्विभुजं चारुलोचनम्।
वामहस्तेनसीतायाः स्पर्शयन् स्तनमण्डलम् ।
ज्ञानमुद्रायुतेनान्येनान्वितं लोकसुन्दरम्।
धनुर्द्वयकरेणापि लक्ष्मणेन सुशोभितम् ।
कोटिकंदर्पसङ्काशं राघवं करुणाकरम् ।
उपविष्टं पद्ममध्ये वीरासन सुशोभितम् ।
हनुमत्सेवितं चाग्रे कुर्यादेवं मनोरमम् ।
दशाक्षरप्रकारोयं कथिते मुनिपुङ्गवाः ।

द्वादशाक्षरी रामध्यानम्

नीलोत्पलदलश्यामं पीतांबरधरं विभुम् ।
द्विभुजं कञ्जनयनं दिव्यसिंहासनस्थितम् ।
वसिष्ठाद्यैश्च परितो वृत्तं रत्नकिरीटिनम् ।
सीतासंलापचतुरं दिव्यगंधादिशोभितम् ।
चापद्वयकरेणाथ सेवितं लक्ष्मणेन च ।
शत्रुघ्न भरताभ्यां च पार्श्वयोरथ सेवितम् ।
ध्यायन्नन्यधीः (एवं)रामं द्वादशाक्षरमन्वहम् । (अगस्त्ये)

श्रीकृष्णध्यानम्

कस्तूरितिलकं ललाटपटले वक्षस्तलेकौस्तुभम् ।
नासाग्रेवरमौक्तिकं करतले वेणुं करे कङ्कणम् ।
सर्वाङ्गेहरिचन्दनसुललितं कण्ठेश मुक्तावलिम् ।
गोपस्त्रीपरिवेष्टितो विजयते गोपाल चूडामणि ।

65मदनगोपाल-ध्यानम्

कोदण्डमैक्षवमनेकशरं च पौष्पं चक्राब्जपाशसृणिकांचन वंशनालम् ।
बिभ्राणमष्टविधबाहुभिरर्कवर्णं ध्यायेत् हरिम् मदनगोपविलासवेषम्

जगन्मोहन कृष्णध्यानम्

अंसालंबितवामकुण्डलधरं मन्दोन्नतंमूलतम्।
किंचित्कुंचितकोमलाधरपुटं साचिप्रसेराक्षणम् ।
आलोलाङ्गुलिपल्लवैर्मुरलिका मापूरयन्तंमुदा ।
मूलेकल्पतरोः त्रिभङ्गिललितं ध्यायेज्जगन्मोहनम् ।

योगेश्वर कृष्णध्यानम्

स्मर्तव्यस्सोपि भगवानतसीकुसुमद्युतिः ।
वहन्तौ वामहस्तेन सर्वशास्त्रार्थपुस्तकम् ।
दक्षिणेन तु शास्त्रार्थमादिशंश्च यथास्थितम् ।(बृहद्ब्रह्मसंहिता-स-ऽ)

राधा कृष्णध्यानम्-1

अथ ध्यानं प्रवक्ष्यामि मन्त्रस्यास्य प्रियात्प्रिये ।
पीताम्बरं घनश्यामं द्विभुजं वनमालिनम् ।
बर्हिबर्हकृतापीडं शशिकोटि निभाननम् ।
धूर्णायमान नयनं कर्णिकारावतंसिनम् ।
अभितश्चंदनेनाथ मध्ये कुंकुमरेखया ।
रचितं तिलकंफाले बिभ्राणं कमलाकरे ।
तरुणादित्यसंकाशं कुण्डलाभ्यां विराजितम् ।
घर्माबु कणिकाराजद् दर्पणाभ कपोलकम् ।
प्रियामुरव विदुन्यस्त लोचनं चोत्तर भ्रुवम् ।
नासाग्रविस्फुरन्मुक्ता शुद्धांशु विलसन्मुखम्।
दशनज्योत्सया राजत् पक्कबिम्बफलाधरम्।
केयूरा ङ्गदसद्रत्न मुद्रिकाविलसत्करम्।
बिभ्रतं मुरलीवाद्यं पाणौपद्म तथापरे ।
कांचीदाम स्फुरन्मध्यं नूपुराभ्यां लस त्पदम्।
रतिकेलिरसावेश चपलं चपलेक्षणम् ।
हसन्तं प्रिययासा र्धं हासयन्तं च तां मुहुः ।
हत्थं कल्पतरोर्मूले रत्नसिह्मासनोपरि ।
वृन्दारण्ये स्मरेत्कुष्णम् संस्थितं प्रियया सह ।

वामभागेस्थितां तस्य राधिकां संविचिन्तयेत् ।
नवीन नीलवसनाम् धुतहेमसमप्रभाम्।
पटांचलेनावृतार्थ सुस्मेरानन पंकजाम्।
कांतवक्रसुधाधाम चकोरायुत लोचनाम्।
अङ्गुष्ठतर्जनीभ्यां च निजप्रियमुखाम्बुजे ।
अर्पयन्तीं पूगफलं पर्णाचूर्णसमन्वितम्।
मुक्ताहारोल्लसच्चारु पीनोन्नत पयोधराम् ।
क्षीणमध्यां पृथुश्रोणीं किंकिणीजालशोभिताम् ।
रत्नहाटककेयूर मुद्रावलय धारिणीम् ।
रणत्कटक मञ्जीर रत्नपादांगुलीयकाम् ।
लावण्यसारमुग्दाङ्गीं सर्वावयवसुंदरीम्।
आनंदरसमग्नां च प्रसन्नां नवयौवनाम् ।
सख्यश्च राधिकाया वै तत्समानवयो गुणाः ।
तत्सेवनपराभाव्या श्चामर व्यजनादिभिः ।
जानासि हृदयावासे तथापि कथयामि ते ।
अन्येषां च प्रभोदार्थं मन्त्रार्थममलं प्रिये ।

68-राधाकृष्णस्य ध्याने-2 (बृहद्ध्वे part-1-13a)

कर्णिकायां बालेंदुमण्डले जलदाकृतिम् ।
सुवर्णवर्णया देव्या राधया परिवेष्टितम् ।
कोटिकंदर्पमुग्दाङ्ग मरविदनिभेक्षणम् ।
मयूरपिंछाभरणं स्फुरन्मकरकुण्डलम्।
बंधूकजलविभ्राजत् पाणिपाद तलाधरम् ।
त्रि भङ्ग सुंदरग्रीवं वेणुवादन तत्परम्।

कुटिलालकमा पीन भुजदण्डविभूषितम् ।
वलयांगदमाणिक्य मयूरव विलसत्तमम्।
स्फुरन्मुक्ताफलोदार द्युतिपूरित वक्षसम्।
श्रीवत्सकौस्तुभोरस्कं रणत्कांची कलापकम् ।
मञ्जु मञ्जरि निर्घोष दृष्टपादसरोरुहम् ।
वधूकदंबमध्यस्थ मुदारगुणमण्डितम्।
वीणावादनतत्वाज्ञं गानमोहित मन्मथम् ।
*पार्श्वे विचिंतयेद्देवीं राधिकां परदेवताम् ।
कामकेलिकलाभिज्ञां उन्निद्र जलजेक्षणाम् ।
क्षीणमध्यामनिंद्त्याघ्रीं मुग्धहासां महच्छविम् ।
गीतकाव्य कथालाप विद ग्दांसुंदरोदरीम् ।
किशोरीं शैशवक्रीडा परमव्यंजितस्तनीम् ।
नीलशाटिपरीधानां पङ्ककाश्मीर पंकिलाम् ।
पङ्कजांदोलितकरां कालिंदी केलि लंपटाम् ।
श्रीकृष्णांस समासक्त पाणीमाहूत षद्दाम्।
कौमूदिवल्लभां कान्तां वृन्दावनविलासिनीम् ।
नित्यानपायिनींविष्णोः भावयेद्रस दीर्घिकाम् ।

श्रीराजगोपाल ध्यानम्।-1

एक वस्त्रांचितो बालः बर्ह पीडांबुजाननः ।
गोपदण्डधरो मन्यन् चारयन्पशुमण्डलम्।
पादुकाक्त पदांबोजं पद्माजानिरदृश्यतम् ।
तं दृष्ट्वा प्रणमन् भक्त्या पुनरन्यमयाचितम्।
वस्तुमेस्तु दृशोरग्रे क स्तूरि तिलकाञ्चितम् ।

अस्तोक करुणासांद्रं न्यस्तुलं चंपकालयम् ।
हैमं वेत्रं त्रिणति मकरे दक्षिणेसंदधानम्
सत्यांसैन्यं कर सरसिजं वामभागे न्यसन्तम् ।
व्य स्तंताङ्घ्रि स्मितवदनया भैमया प्रेक्ष्यमाणः
तिष्ठन्मध्ये कनक गहने श्री राजगोपाल रूपम् ।

श्रीराजगोपाल ध्यानम्।-2

दक्षिणद्वारका मध्ये निशारव्ये सरितस्तटे ।
चिंतयेच्चंपकारामे कल्पद्रोःपादमूलके ।
प्राकार गोपुरोपेते स्वर्णमण्टपसंवृते ।
नानारत्नमयेदिव्ये स्वायंभुव विमानके ।
तन्मध्ये गर्भगेहेतु पद्मपीठेस्थितं विभुम् ।
वासुदेवं चतुर्भाहुं इन्द्रनीलसमप्रभम्।
सर्वाऽलंकारसंयुक्तं शङ्खचक्र गदाधरम्।
दधानं दक्षिणे हस्तेरम्यामभयमुद्रिकाम्।
सुवर्णमकुटोपेतं मामहिपरिसेविताम् ।
तस्याग्रे राजगोपालं दिव्यसिह्मासनस्थितम् ।
दिव्यपीतांबरधरं दिव्याऽऽकल्प परिष्कृतम् ।
दिव्यस्त्रग्गन्ध कस्तूरि कण्ठिकाद्यैरलंकृतम् ।
मन्धस्मितमुदाराङ्ग मदनायुत सुंदरम्।...
त्रिभङ्गि ललिताकारं परमात्मानमव्ययम् ।
दक्षिणंस्वस्तितं वामं न्यस्यन्तंकुञ्चितंपदम् ।
पद्मनाभं परंज्योतिं श्रियोवात्सल्य वक्षसम् ।
रुक्मिणी सत्यभामादि स्त्रीभिरष्टाभिरावृतम् ।

षोडशस्त्री सहस्त्रेशं चंपकेशं परात्परम् ।

चतुर्भुजगोपालध्यानम्-

देवकी गर्भसंभूतं चतुर्भुजमयं विभुम् ।
हस्तेधृत गदाशार्ङ्ग पाञ्चजन्य सुदर्शनम्।
स नन्दकं हरिंबालं बालसूर्यायुतप्रभम्।
सिद्धचारण गंधर्वै दिषद्भिस्तु समं दिवि ।
पश्चिमानेस्तुतं रत्नमकराकृति कुण्डलम् ।
देवकी वासुदेवाभ्यां पुण्यभाग्भ्यां सुपूजितम्।
मङ्गळाशिप्रयुञ्ज्यास्मे कंसभीति प्रशान्तये ।
ताभ्याम्सुसंस्कृतं देवं दृष्ट्वाग्रे गीसगोपिलः ।
चिरं संसेव्यन्मुदितः परंरूपमयाचत ।

71- गीतोपदेश ध्यानम्

तथाऽर्जुनसारथ्यकुर्वाणं तं दयांबुधिम् ।
पिञ्चचूडं विशालाक्षं श्रीवत्साङ्कित वक्षसम् ।
कालमेघनिभं शान्तं मन्मथस्यापि मन्मथम् ।
वामहस्तेन मुख्येन दक्षिणेन करेण तु ।
कराभ्यां तौ वहन्तं हि वृतोद प्रगृहौ हरिम्।
कपिध्वजाय भक्ताय ब्रह्मविद्योपदेशिकम् ।
स्यन्दनांबु तुरगवुररेणुचिताननम्।
सारथ्याश्रमज स्वेदबिंदु मुक्ताफलाङ्गकम्।
विशेशरं विशालाक्षं तथा भीबत्सु सारथिम् ।
प्रणम्यप्राञ्जलिर्भूत्वा पुनरन्यमयान्वितम्। paadme-

71-अन्तर्यामि श्रीमन्नारायणध्यानम्-

द्विहस्तमेकवक्रं च शुद्धस्फटिकविग्रहम् ।
सहस्ररविवह्नींदु लक्षकोटिसमप्रभम् ।
मरीचिचक्रमध्यस्थं चक्राद्यायुधलाञ्छनम्।
श्रीवत्सकौस्तुभोरस्कं वनमालाविभूषितम्।
पीताम्बरधरं सौम्यरूपं आद्यमनामयम् ।
श्रीवासुदेवोविज्ञेयः सृज्यं स र्वं चतुर्मुखात्।
एवं च योगिभिर्नित्यं हृत्पद्माह्वय विष्टरे ।
पश्यंतिसूरयश्शश्वत् तद्विष्णोःपरमं पदम् ।

72- अर्चावतार भगवतः सौन्दर्यध्यानम्। नखशिखावर्णनम्

ब्रह्मरुद्रेन्द्र सूर्याद्यैः वन्द्यमानपदाम्बुजम्।
मणिनूपुर सद्भूषा विलसत्पादपङ्कजम्।
लक्ष्मीकलादिकाधीर जंघादुदय भासुरम्।
रत्नादर्श परीहासं रसिकाद्भुत जानुकम्।
करिराजकरोदार चारूरु युगलोज्ज्वलम् ।
पीतांबरावृतकटिन्यस्त नन्दक भूषितम्।
विधातृ जन्मभूनाभि कमलेनाति सुन्दरम् ।
अन्तः पुरैरनेकाण्ड संशोभित तनूदरम् ।
कमलाकुच कस्तूरि तरञ्जित भुजान्तरम्।
श्रियाश्रित विशालोर स्फुरत्कौस्तुभ भूषितम् ।
श्रीवत्सस्फुरितोरस्कं ब्रह्मसूत्र समन्वितम्।
कम्बुग्रीवं पीवरांसं दीर्घबाहुं महोरसम् ।
चतुर्भुजमुदाराङ्गं विलसत्पाणिपङ्कजम्।

दक्षिणेनकराब्जेन कन्यादान प्रियंकरम् ।
वहन्तं वामहस्तेन शार्ङ्गंविद्युल्लताप्रभम् ।
सन्ददानं गदांगुर्वीं निषण्णां अंबुजासने ।
पश्चात् दक्षिण हस्तेन चक्रं कोटि रविप्रभुम् ।
वहन्तं वामहस्तेन शङ्खं कोटीन्दुसन्निभं ।
मुखसौन्दर्य न्यस्यन्तः चुबुकस्थल शोभितम् ।
गण्डमण्डल संलग्न रत्न कुण्डल भूषितम् ।
मन्दहासोल्लसत्कुन्द दन्तबन्धुप्रियाऽधरं ।
जांबूनत मयोदीप्त चम्पकोपम नासिकम् ।
निरङ्कुश दयापूर तरङ्गित विलोचनम् ।
शीतलैः दृष्टि पातैः जगदा ह्लाद कारिणम् ।
बालचन्द्रप्रतीकाशं फालोद्यत्तिलकोज्जलम् ।
घन कुंचित नीलालि ललिताञ्जन सन्निभैः ।
माधवी मल्लिकाजातिपुष्पैः संविलितान्तरैः ।
कर्पूरदूसरैद्रव्यैः शोभितं शिशिरोरुगैः ।
अनन्तरत्न खचितं किरीटेन विराजितम् ।
कन्दर्पकोटि सदृशं कल्याण गुण विग्रहम् ।
अतिसौन्दर्यदेवेशं आर्तरक्षण दीक्षितम् ।
चक्राभकृत तेजोर्क प्रार्थनान्तद्युतिं प्रभुम् ।
सौन्दर्यारण्यनिलयं सर्वाभीष्टफलप्रदम् ।
वेदवेदाङ्गवेदार्थ वेदमन्त्रस्वरूपिणम् ।
श्रीभूमि सहितं देवं श्रीसौन्दर्यराजमाश्रये ।

प्राणशक्त्याः ध्यानम्

रक्तांबोधिस्तपोतोल्लसदरुणसरोजाधिरूढाकराब्जैः-
पाशंकोदण्डमिक्षूद्भवमळिकुलमप्यंकुशं पञ्चभानान्।
बिभ्राणं सृक्कपालं त्रिनयनवदना पीनवक्षोरुहाढ्या
देवीबालार्कवर्णाभवतुसुखकरी प्राणशक्तिःपरा नः।

वैकुण्ठनाथ ध्यानम्

कूर्मादीन् दिव्यलोकं तदनु मणिमयंमण्टपं तत्र शेषम्।
तस्मिन् धर्मादिपीठं तदुपरि कमलं चामरग्राहिणीश्चि ।
विष्ण देवीं विभूषायुधगण मुरगं पादुके वैनतेयम्।
सेनेशं द्वारपालान्कुमुदमुखगणान्विष्णुभक्तान्प्रपद्ये ।

आधारशक्त्याः ध्यानम्

-आधेयतुल्यसामर्थ्य अस्यरूपं तथा विधम् ।
चतुर्मुखं चतुर्बाहुं शुद्धस्फटिक सन्निभम्।
किरीटहारकेयूर प्रमुखाकल्प कल्पितम् ।
श्रीवत्साङ्गंशङ्खचक्र गदापद्मायुधैर्युतम्।
तेजोमण्डलमध्यस्थं ध्यायेदाधार रूपिणम् ।

75- कूर्मकालाग्नेर्ध्यानम्

आधारशक्तेरुपरि विमलं दीप्तविग्रहम्।
ज्वालाशतसमाकीर्णम् शङ्खचक्रगदाधरम्।
एकवक्त्रं चतुर्बाहुं जपापुष्पसमद्युतिम्।
शङ्खचक्रगदापद्म शार्ङ्ग खड्गधरं द्विज।
वह्निमण्डलमध्यस्थं ज्वालाविततविग्रहम्।
सकलाभरणोपेतम् ध्यायेत् कूर्ममनन्तरम्।

76- मणिमण्डपध्यानम्।बृहद्ब्रह्म-३भागे-५अ

देदीप्यमानमणिनिर्मितवेदिकायां स्तम्बालसंति नवकाममयस्समस्तात् ।
येषामसीम रजनीश मयूरवजालैः जीवंति सज्जनविलोचन सच्चकोराः ।
संकल्पकल्पित विचित्र मणिप्रवेक सोपानपङ्क्तिविगलद्युमणिप्रकाशाः ।
कुर्वंति वज्रघटिताजिर दर्पणांत स्संसृज्य दिव्यवसनास्तरणोपमानम् ।
आराम मण्डप शिखाश्रितवारिपात विच्छिन्न नीरकरबृंद मनूत्सृजंतः ।
पुष्पैः किरंत इवमण्डप पादमूलं विष्वग्विमुग्धजलयंत्र चमालसंति ।
मन्दारपादप पराग विषक्तमत्त बृंगावली विरुतजातरतीवभेदैः ।
संसेवितं चलतिचास्तुमरालमाला मंजीर निस्वनचयैः परितोविगीतम् ।

77-(सहस्त्रफण)अनन्तस्य ध्यानम्।

पूर्णचन्द्राननं ध्यायेत्सहस्त्रफणिभूषितम्।
चक्रलाङ्गल हस्तं च प्रणमन्तं परात्परम्।
स्फटिकाद्रिप्रतीकाशं चतुर्बाहुं किरीटिनम् ।
ला ङ्गलम्मुसलं मुख्यकरयोर्दधतं शुभम्।
जघन्याकरयोश्शङ्खं चक्रद्वन्द्वं यथा तथम् ।
नीलाम्बरधरं दंष्ट्राकराल वदनैर्युतम् ।
फणामणिसहस्त्रांशु नीलांजन विराजितम् ।
अनन्तवक्रकुहरैरुद्वमन्तमुदर्चिषम्।
मण्डलीकृत नागेन्द्र भोगवेष्टनविग्रहम् ।
ध्यायेदनन्तमुभयोःपार्श्वयोर्नागयोषितः ।
देव्यस्तस्य सुखासीनाः फणामण्डलमण्डिताः ।

78-(भूमन्त्रः)धरायाःध्यानम्

कुङ्कुमोदकसंकाशां हेमरत्नविभूषिताम् ।
पद्मासनेनोपविष्टाम् धरणीं लोकमातरम् ।
बद्धाञ्जलि शिरोदेशे संस्मरन्तीं विभोः स्मरेत् ।

79-क्षीरोदस्य ध्यानम्

शान्तमु ज्झितचेष्टञ्च सितमन्तर्मुरवं स्थितम्।
ध्यायमानं सितं शङ्खं मुक्तादामैरलंकृतम्।
शुद्धकुन्देन्दु धवलं स्रोतोरश्मिभिरावृतम् ।
कीर्णसंपूर्ण चन्द्राभं ध्यायेत् गंभीर विग्रहम् ।
विक्षिप्तजानुपादञ्च जटिनं क्षीरसागरम् ।पारमे 5 अ

80 - <u>आधारपद्मस्य ध्यानम्</u>

सुपक्काम्रफलश्याम पाणिपादतलोज्ज्वलम्।
रक्ताक्षञ्च तथा विप्रकीर्णकेशं स्मिताननम् ।
पद्मासनेनोपविष्टं पद्ममुद्रान्वितं तथा ।
प्रशान्तपावकाकारमुदयादित्यसन्निभम्।
ध्यायेद्द्वैविभुजं ह्रस्वं जठराद्यैर्विलंबितम् ।
भासितं सित दंष्ट्रं च वेष्टितं सुरषड्दैः ।
व्यक्ताव्यक्तपरत्वेन पद्मात्यं त्रितयं स्मरेत् ।पारमे 5 अ

81- <u>धर्मादीनां ध्यानम्</u>

तुहिनाचोपल स्वच्छमुक्ताफल शशिप्रभाः ।
मूगेन्द्रस्कन्धवदनाः धर्मज्ञानादयश्चतु ।

82- अधर्मादीनां ध्यानम्

पद्मरागप्रवालाग्नि सदाडिमफलोज्ज्वलाः ।
अन्तर्दधोपरक्ताश्च राजराजेशरोपमाः ।
द्विरष्टवर्षवत्कान्ताः चतुरोऽधर्म पूर्वकाः ।

83- वेदानां ध्यानम्

हेमपञ्चक खद्योत हरिताल समोज्ज्वलाः ।
वाजिवक्त्रास्स्मृता वेदाः संपूर्ण नर लक्षणाः ।

84- युगानां ध्यानम्

एवं वृषेन्द्रवदनाः युगा ब्रह्मन् कृतादयः ।
सुपक्वाम्रातसीपुष्प नीलाज शुकसन्निभाः ।
सर्वे सद्वस्त्र सत्पुष्प सदलङ्कारणान्विताः ।
शङ्खपद्मधरास्सर्वे वराऽभयकरास्तुवा ।
बद्धाञ्जलिपुटाश्चापि बिभ्राणो योगपीठिकाम् ।
आधेयचक्राविन्यस्त मस्तकानात्मसिद्धये.
समर्पितान्तः करणाः परस्मिन्मन्त्रकारणे ।
सर्वेचतुर्भुजास्वेते द्वाभ्यां सन्धारयन्ति च ।
पीत मञ्जलिना द्वाभ्यां प्रनमन्ति जगत्प्रभुम् ।

85 - कालचक्र ध्यानम्

युगान्तार्काग्नि सङ्काशं स्वगोमण्डल मध्यगम् ।
स्वमुद्राव्यक्तपाणिञ्च वल्गन्तं हेतिराट् स्मरेत् ।

86 - अव्यक्तपद्म ध्यानम्

सितमव्यक्तपद्मञ्च हिमहेमाग्नि भास्वरम् ।
शान्तमष्टभुजं सौम्यं संस्थितं स्वस्तिकेन तु ।

87 - भावासनस्य ध्यानम्

स्फटिकोपलार्कंच चिद्गनं ध्रुवमव्ययम् ।
सर्वशक्तिनिर्धिं ध्यायेत् अ मूर्तिं चित्प्रभाकरम् ।

88 - गणेशमन्त्रध्यानम्।

ध्यायेच्चम्पक वर्णाभं बद्धपद्मासनं द्विज ।
वरदाभय हस्तञ्च दक्षिणेचाक्षसूत्रकम् ।
विश्रान्तं चिन्तयेद्वामं चतुर्थं परशूपरि ।
स्थूलाङ्गमेक दंष्ट्रं च लम्बक्रोडं गजाननम् ।

89- किरीटादि आयुधानां ध्यानम्

अङ्गुष्ट तर्जनीमध्ये सनालं कमलं भवेत् ।
वरदेकमलाकारं लिखेत्करतलोदरे ।
अधोमुखे वामहस्ते मुख्ये कुर्याद् गदां शुभाम् ।
जघन्ययोस्तुकरयोः शंखं चक्रं निवेशयेत् ।
बाहुष्वष्टौ देवस्य तानितान्यायुधान्यपि ।
निवेशयेद्यथाकामं शिल्पी शास्त्रविचक्षणः ।
किरीटकुण्डले हारान्यङ्गु लसुत्रान्यङ्गुलीयके ।
कौस्तुभं वनमालाम् च श्रीवत्सं दक्षिणोरसि ।
अङ्गदे कटके रम्ये कांचीदाम च नूपुरे ।
दुकूलमुत्तरीयं च सोत्तरीयं निवेशयेत् ।
देशकालोपलभ्यानि भूषणानि निवेशयेत् । (भार्गवतन्त्रं-४अ)

90- किरीटादि आयुधानां ध्यानम्-2

किरीटलक्षणं वक्ष्ये शृणु वत्स समाहितः ।
देवदेवस्य विप्रर्षे परसूक्ष्मस्वरूपिणः ।

किरीटं शिरवरंचैव मौलितन्त्र किरीटकम् ।
चतुर्विधं समाख्यातं तन्त्रेऽस्मिन् तत्र वेदिभिः ।
किरीटं वासुदेवस्य सर्वावासस्य चक्रिणः ।
संकर्षणद्वितीयं तु मकुटं समुदाहृतम् ।
प्रद्युम्नस्य तृतीयं च चतुरश्रं चतुर्थकम्।
एतेषां मानमव्यग्रं शृणु त्वं मुनिपुङ्गव ।
किरीटं हस्तमुत्सेधं विस्तारं तु तदर्धकम् ।
मौलिघट्टस्य विस्तारं एकहस्तं च मण्डपम् ।
मध्ये तस्यैव मध्यं स्यात् तदन्तेन तदर्धकम् ।
मणिरत्नप्रवालानां यथालाभेनां कारयेत् ।
परं युक्तिमतां देव मकुटादीनि कारयेत् ।
अन्येषां चैव देवानां मौलिकेन वशं कुरु । वासिष्टसंहिता- ५अ

अनन्त (उरगः)ध्यानम्-

तिर्यगूर्ध्वंतदाधारं ज्वालामालामिवोज्वलम् ।
अनन्त शशि शंकाशम् अनन्तमथ संस्मरेत् ।
सहस्रफणमालाढ्यं सहस्रफणभूषितम्।
स्वपाणिसंपुटेनैव सौभवत् स्वांकभूतलम् ।
सितारविंद शंकाक्ष सूत्रचक्र करान्वितम् । पौष्करम्-२४अ ।

92–पादुका ध्यानम्

पादुकालक्षणं वक्ष्ये श्रुणु राजकुलोद्भव ।
एकपादं द्विपादम् वा वृत्ताकारम् तु चक्रवत्।
तन्मध्ये चतुरङ्गुल्यं छिद्रितानाम् सुवृत्तकम्।
पादुकालक्षणं प्रोक्तम् सर्वैश्वर्यप्रदं नृणाम् ।

93-गरुडस्य

रक्ततुण्डं महाप्राणं भीम सुकुटिलोचनम् ।
द्रवच्चामीकराभासं पक्षमण्डलमण्डितम् ।
सम्स्मरेद्गरुडं विप्र गृध्रवक्त्रं पृथूदरम्। ईश्वरे-२४अ
गरुडस्यद्वयंविद्धि हृद्देशेंजलिस्थितः ।
तत्रैव संपुटाकारं चतुर्थस्य करद्वयम् ।
दक्षिणेऽमृतकुंभस्तु वामे तु विषमं फणी ।

94-अष्टभुजगरुडध्यानम्।-काश्यपसंहिता-२अ

-अष्टबाहुधरंदेवमष्टायुध विभूषितम्।
शंखं चक्रं सुधाकुम्भं नागमुष्टिगदामसिम्।
भगवत्पादविन्यस्त करमष्टभुजं क्रमात्।
स्वांसे निधाय लक्ष्मीश कालमेघमिवोत्थितम् ।

95-विष्वक्सेनध्यानम्।

चतुर्भुजमुदाराङ्गं गदाशङ्खधरं विभुम्।
नवाम्र फलसङ्काशं पिङ्गश्मश्रु विलोचनम् ।
पीतवस्त्रं चतुर्दंष्ट्रं स्वमुद्राद्वितयान्वितम् ।
माणिक्यकुण्डलाद्येन युक्तं श्रोत्रद्वयेन तु ।
मकुटेनोन्नतेनैव हाराद्यैरुपशोभितम् ।
ईषदूर्ध्वं तथा तिर्यक् विनिपातित लोचनम् ।
कुन्देन्दु कान्तिदशनं किञ्चिद्विहसिताननम् ।
स्वभावसौम्यममलं मायाक्रोधोपराजितम् ।
सविलासचलत्पाद न्यासस्थानक संस्थितम् ।
स्वेनान्तः करणेनैव भावयन्तं परंपदम् ।

एवं ध्यात्वार्चयेत् विष्वक्सेनमग्नौ च तर्पयेत् ।

96-चण्डादीनांध्यानम्।

चण्डाद्याविजयान्ताश्च सर्वे ध्यायेच्चतुर्भुजाः ।
गदाचक्रधराश्चैव शङ्खहस्ता महाबलाः ।
तर्जयन्तोह्यभक्तानां दोषाणां ध्वंसनोद्यता ।

97-गङ्गा यमुनादीनांध्यानम्।

तोयाधारं वहन्त्यौ ते कलशं वारिपूरितम् ।
नवयौवन लावण्य स्त्रीरूपञ्च नदीद्वयम् ।

98- शङ्खपद्म निधीनां ध्यानम्।

निधिपौ शङ्खपद्मौ च निधिबाण्डोपरि स्थितौ ।
स्थूलदन्तैश्च पिङ्गाक्षौ द्विभुजौ भगवन्मयौ ।

99- वास्तु पूरुषस्य ध्यानम्

वास्त्वीशक्षेत्रनाथौ द्वौ स्थितौ दक्षेतरक्रमात् ।
शुक्लव ऋः कृष्णदेहो द्विभुजो रत्नपात्रधृक् ।
दक्षिणेनकरेणैव सर्वामर समाश्रयः ।
पुण्डरीकसमानाभ वस्त्रस्त्रगनुलेपनः ।
गदोद्यतकरो विप्र ध्यातव्यो वास्तु पूरुषः ।

100- क्षेत्रपालस्य ध्यानम्

नीलजीमूत संकाश दण्डहस्तं महातनुम्।
मुष्टिकृद्वामहस्तेन याग क्षेत्रावधौ स्मरेत् ।

द्वारलक्ष्म्याः ध्यानम्

101- पद्मकुम्भकरां लक्ष्मीं पद्मोपरिग तां स्मरेत् ।

102- कुमुदादीनाम् ध्यानम्

कुमुदःकुमुदाक्षश्च प्रसन्नवदनेक्षणौ ।
तुहिनाचलसंकाशौ प्रथमे वयसिस्थितौ ।
यानाभरणदिग्धाङ्गौ नानाकु ण्डल भूषितौ ।
नानामाल्याचितौ चैव नानामौलिधरौ द्विज ।
नानागन्धविलिप्ताङ्गौ नाना वस्त्रविभूषितौ ।

103- विष्णुभक्तानां ध्यानम्

ततो ध्यायेद्विष्णुभक्तं सर्वलक्षण संयुतम्।
स्वस्व वर्णाश्रमाचार सदृशाकृति चेष्टितम् ।
बद्धाञ्जलिपुटं वाथ व्यारव्यामुद्रासमन्वितम्।
पद्मविष्टरमध्ये तु स्वासीनं वाथ सुस्थितम् ।
ललाटादिषु चाङ्गेषु ह्यूर्ध्वपुण्ड्रैरल ङ्कृतम्।
लाच्छितं चक्रशङ्खाभ्यां भुजयोर्दक्षिणादितः ।
तुलसीनलिनाक्षाणां मालाद्वितयभूषितम् ।
एवं ध्यात्वा विष्णुभक्तं हृदयादींश्च पूर्ववत् ।

104- तपोलोकादीनाम् वर्णनम्

तपोलोकं त दूर्ध्वेतु वैराजादिभिरन्वितम् ।
पुरुषोत्तम रूपेण मया संरक्षितं स्मरेत् ।
ब्रह्मादिदेवैः संसेव्यं पद्मनाभेन रक्षितम् ।
सत्यलोकं हृदि ध्यात्वा ततोऽण्डं मनसा स्मरेत् ।
अण्डस्यापि बहिस्तोयं व्याप्तं तत्तेजसा रमे ।
वायुना वेष्टितं तेजोव्याप्तं त द्बहिरम्बरात् ।
तस्माद् बहिरहंकारं ततो बुद्धिं ततः परम् ।

105- श्रीसुदर्शनस्वामि ध्यानम्

कल्पान्तार्कप्रकाशं त्रिभुवनमखिलं तेजसापूरयन्तम् ।
रक्ताक्षंपिङ्गकेशं रिपुकुलभयदं भीमदंष्ट्राट्टहासम् ।
शङ्खं चक्रंगदाजं पृथुतरमुसलं चापपाशाङ्कुशादीन्।
बिभ्राणं दोर्भिरी ढ्यं मनसि मुररिपुं भावयेच्चक्रसंस्थम् ।

106– त्रिभङ्गिलक्षणम्।

त्रिषुमार्गेषु भङ्गत्वात् त्रिभङ्गित्वं विधीयते ।
वक्रं दक्षिणतोभङ्गे मध्यकायं तु वामतः ।
कटिर्दक्षिणतो भङ्गे भङ्गत्रयमुदाहृतम् । विष्वक्येनम्-अ- ११

107- हनुमतः प्रार्थना

बुद्धिर्बलम् यशोधैर्यम् नि र्भयत्वमरोगता ।
अजाड्यं वाक्पटुत्वं च हनुम त्स्मरणाद्भवेत्।

108- भगवतः भोज्यासन प्रार्थना

या प्रीतिर्विधुरार्पिते मुररिपोकुन्त्यर्पिते या दृशि ।
या गोवर्धन मूर्ध्नि या च पृथुके स्तन्ये यशोदार्पिते ।
भारद्वाज समर्पिते शबरिका दत्तेऽधरे योषिताम् ।
या प्रीतिर्मुनिपत्नि भक्तिरचितेऽप्यत्रापि तां तां कुरु ।

109– विष्णु पूजासंग्रहम् (शेषसंहिता १५म् अध्याये)

स्वाचान्ता स्वोर्ध्वपुण्ड्रः प्रणमनमजिनाद्यासनं चासुयामः । साङ्गन्यासो
जपस्यात् हृदयकमलके मानसी देवपूजा ।
वामस्थं वारिपात्रं कुसुममितरत श्चान्यदग्रेऽर्घ्यपाद्या-
चामस्नानीयमर्घ्याद्धरितनु कुसुमस्यात्मनाम् प्रोक्षणंस्यात्।
आह्वानं चासनार्घ्यं पदसलिलमथाचाम पुंसूक्तयुक्त

स्नानं वस्त्रोपवीते मलयजकुसुमे धूपदीपौ क्रमेण ।
मध्वादिः पर्क आदावुपरि च सलिलम् पायसाद्यन्नजातं
पानीयाचामपूगम् परिगतिनमनोद्वासनं विष्णपूजा ।

110 - अष्टमहासिद्धयः

अणिमामहिमा चैव लघिमा प्राप्तिरेव च ।
प्राकाम्यं चेशिता चैव वशिता कामाश्चाऽष्टसिद्धयः ।

फलश्रुतिः

आयुरारोग्यमैश्वर्यं विद्यां तेजो जयं यशः ।
सत्सुतांश्चापि सन्तोषं यद्यदिष्टमिह द्विजाः ।
तत्सर्वमचिरादेव लभन्ते नात्र संशयः । ।

****